A.C. Joshi Library
P.U. Chandigarh

MSS No. 9 Subject Astrology

Name of MSS Tājikanilakanthi

Author Nilakanth

Period — — Folios 39

Script Sanskrit Source Prithipal Singh

Missing Folios

1335

(Sanskrit)

TAJIK NILKANTHI

[illegible]

नी·कं·
३·
वि·ना·
१

ॐ स्वस्तिश्रीगणेशायनमः॥ चण्डीकुण्डलमाकलय्यकुतुकाद्धुण्डाभशुण्डाग्रगंकृत्वातातफणेवडस्वरेपशुपतेःखेलन्नलंखेलनम् तुं
ण्डाग्रेणविमण्डलंतदपरंसंदर्शयन्नम्बरेहेरम्बोजगदम्बिकाविहसयन्वःश्रेयसेगर्जताम् १ दिवाकरोनामबभूवविद्वान्दिवाक
रभोगणितेषुमन्ये स्वकल्पितैर्येननिबन्धवृन्दैर्बद्धंजगद्दर्शितविश्वरूपम् २ तस्यात्मजाःपंचसमाबभूवुःपंचेन्द्रकल्पागणिता
गमेषु पञ्चाननाख्यारिगणेन्द्रभेदेपंचाग्निकल्पाद्विजकर्मणाच ३ यज्जनिष्टकुलनामाज्येष्ठस्तेषांकनिष्ठकानां विद्यानवद्यवाचं
प्राचांवेत्ताजगत्ख्यातः ४ तस्माज्जातःकनिष्ठोविविधबुधगणश्रेष्ठतांप्रापयोप्रोज्ज्योतिःप्राक्तेणशास्त्रप्रकटितविभवायस्य
शिष्याःप्रशिष्याः विस्रज्योतिर्विडवीपतिविदितगुणोभूमिदेवीकरेन्द्रोग्रन्थव्याख्यानरवीकृतविबुधमरुद्गर्वहागर्वभाजाम्
५ आसीद्दासितसिन्धुदासीकृतगणकगणग्राममणीगर्गभेत्तावेत्ताग्रन्थान्तराणामितिगुरुरनुजस्तस्यकस्याप्यजेयः मल्लारिर्वादि
वृन्दप्रशमनविषयेकोपिमल्लारिनामाव्यक्ताव्यक्तप्रवक्ताजगतिविशदयन्सर्वसिद्धान्तवेत्ता ६ तस्यानुजःकेशवनामधेयो
ज्योतिर्विदानन्दसमुद्रचन्द्रः वाणीप्रवाणीवचनामृतेनसंजीवयामासकलाविलासी ७ तस्यानुजःसंप्रतिविश्वनाथोविलोः
प्रसादादरुणमात्रविलः सर्वज्ञदैवज्ञविलासवित्तोनृसिंहदत्तादितमर्वविघ्नः ८ आसीद्वेदान्तवेदीस्मृतिनिगमपटुर्ग्रामम
णीगर्गभेत्ताकर्त्ताग्रन्थान्तराणांपणिपतिनिगमस्यापिवेत्ताधिकाग्नि अङ्गःश्रीनीलकण्ठात्मजभजनपटुर्नीलकण्ठःस
चक्रेसंतानहेतोरसकलशुभदम्पाउदेशार्दशाभृतम् ९ गोलानीरम्यगोलाभिधपुरवसतिःपार्थदेशोक्तमध्यःसंज्ञा
तन्त्रसारीकांव्यरचयदभिनवांगद्यपद्यानवद्याम् शास्त्रहिंस्त्रोपकृत्यैविशदतरतयादैवविद्भिःस्वनाथोग्रन्थोग्रन्थिभेत्ताग्रह
गणितविदामग्रगण्योपवर्गः १० निर्विघ्नग्रन्थसमाप्त्यर्थंमंगलमाचरंश्चिकीर्षितंप्रतिजानीते श्रीगणेशेति १ श्रीनीलक
ण्ठस्ताजिकंसूक्तिभिः सयुक्तिभिर्नानाछंदोभिर्वाविविनक्तिप्रकटीकरोति कथंभूतंस्मरिमनःप्रसादकृत् सूरयःपण्डितास्तेषांमनस
न्तःकरणं तस्यप्रसादकृत् एतद्ग्रन्थावलोकनेनपंडितमनःप्रसन्नंभवतीत्यर्थः किंकृत्वा हेरंबंगणेशंप्रणम्य पुनःकिंकृत्वादिकाकेरमर्थंप्रणम्य

अथमिथुनराशिस्वरूपमाह प्रत्यगिति ४ द्वन्द्वं मिथुनराशिरेतादृशः स्वरूपो ज्ञेयः यथा प्रत्यक् पश्चिमदिक्स्वामी समीरो वायुराशिः
शुकभाः शुककान्तिः हरिद्वर्ण इत्यर्थः द्विपात् द्विचरणः ना पुरुषराशिः द्विमूर्त्तिः द्विस्वभावः चरस्थिरस्वभावात्मकमित्यर्थः तत्रा
पि पूर्वार्द्धं स्थिरं उत्तरार्धं चरमिति विशेषो ज्ञेयः उक्तंच चरराशौ विपरीतं मिश्रं वा चांद्रि मत्स्योदये स्थिरवत्प्रथमेर्धे स्यादपरे चरराशि
वत्सर्वमिति विषमोदयः उष्णः मध्यप्रजासंगः मध्यमप्रजः मध्यमस्त्रीसंगश्च वनस्थः अरण्यचारी शूद्रः शूद्रवर्णः दीर्घस्वनो महाश
ब्दः स्निग्धः स्निग्धगुणः दिनेट् दिवाबली नयाशब्दः पादस्वरणो उग्रः क्रूरः अयं स्त्रयांगः ४ अथ कर्कराशिस्वरूपमाह बहुप्रजेति ५
कुलीरः कर्कटराशिः एतादृशो ज्ञेयः यथा बहुप्रजासंगपदः बहुप्रजः बहुस्त्रीसंगः बहुचरणश्च चरश्चरसंज्ञकः अंगनास्त्रीराशिः

प्रत्यक्समीरः शुकभा द्विपान्ना द्वन्द्वं द्विमूर्त्तिर्विषमोदयोऽलः मध्यप्रजासंगवनस्थशूद्रो दीर्घस्व
नः स्निग्धदिनेट् नयोग्रः ४ बहुप्रजासंगपदः कुलीरश्चरोङ्गनापाटलहीनशब्दः शुभः कफी
स्निग्धजलांबुचारी समोदयो विप्रनिशोत्तरेशः ५ पुमान्स्थिरोग्निर्दिनपीतरूक्षपित्तोऽलपूर्वेशप्राह
ष्टश्चतुष्पात् समोदयो दीर्घस्वोऽल्पसंगप्रजो हरिः शैलनृपोग्रपस्नः ६ ॥ ॥

पाटलः श्वेतरक्तवर्णः हीनशब्दो निःशब्दः शुभः सौम्यः कफी कफप्रकृतिः स्निग्धः स्निग्धगुणः जलं जलराशिः अम्बुचारी जल
चरः समोदयी विप्रो ब्राह्मणवर्णः निशाबली उत्तरेशः उत्तरदिक्स्वामी अयं स्त्रयांगः ५ अथ सिंहराशिस्वरूपमाह पुमा
निति ६ हरिः सिंहः एतादृशः पुमान् पुरुषराशिः स्थिरः स्थिरसंज्ञकः अग्निः अग्निराशिः दिने दिवाबली पीतः पीतवर्णः
रूक्षः कान्तिरहितः पित्तः पित्तप्रकृतिः उष्णः पूर्वेशः पूर्व[illegible]दिक्स्वामी दृष्टः दृष्टांगः चतुष्पाच्चतुश्चरणः समोदयः दीर्घस्वरः म
हाशब्दः अल्पसंगप्रजः अल्पस्त्रीसंगोल्पप्रजश्च शैलः पर्वतचारी नृपः क्षत्रियवर्णः उग्रः क्रूरः पस्नः पस्नवर्णः अयं राशिर्दिवाबली पी

अथ धनुःस्वरूपमाह। नास्वर्णाभा इति नापुरुषराशिः स्वर्णाभा स्वर्णकान्तिः शैलः पर्वतचारी समोदयः अतिशब्दो महाशब्दः दिनं दिवा
बली आक पूर्वदिक्स्वामी ह्रस्वो ह्रस्वांगः रूक्षः कान्तिरहितः पीतः पीतवर्णः राजा क्षत्रियवर्णः उष्णः पित्तः पित्तप्रकृतिः अल्पसुति
संगः अल्पप्रजः अल्पस्त्रीसंगश्च द्विमूर्तिः स्थिरस्थिरस्वभावात्मकः द्विपदः द्विचरणः तत्रापि पूर्वार्धे द्विपादत्वं उत्तरार्धे चतुष्पाद
त्वं ज्ञेयं उत्तरार्धे चतुष्पदत्वं स्वयमेवाग्रे वक्ष्यति अग्निः अग्निराशिः उग्रः क्रूरः अयं राशिर्द्विवर्णः स्वर्णवर्णः पीतवर्णश्च ९ अथ मकरस्व
रूपमाह मृगइति ११ मृगो मकरराशिरेतान् शब्दो ज्ञेयः चरस्थिरसंज्ञकः लाभमितराशिः अर्धरवोऽर्धशब्दः यमाशा दक्षिणादिक्स्वामी
ह्रीह्री राशिः पिंगः पिंगलवर्णः रूक्षः कांतिरहितः शुभः सौम्यः भूमिर्भूमिचारी शीतः शीतलस्वभावः स्वल्पप्रजासंगः स्वल्पप्रजः स्व

नास्वर्णाभाः शैलसमोदयो तिशब्दो दिनं प्राग्ह्रस्वरूक्षपीतः राजोष्णपित्तो धनुरल्पसूतिसंगो द्विमूर्तिर्द्विपदोग्निरुग्रः
९ मृगश्चरः स्यार्धरवो यमाशा ह्रीपिंगरूक्षः शुभभूमिशीतः स्वल्पप्रजासंगसमीररात्रिरादौ चतुष्पाद्वि
षमोदयो विट् ११ कुंभोपदो नादिनमध्यसंगप्रसूः स्थिरः कर्बुरवन्यवायुः स्निग्धोल्पस्वरस्वरतल्पधा
तुःशूद्रः प्रतीची विषमोदयोग्रः ॥ १२

ल्पस्त्रीसंगश्च समीरो वातप्रकृतिः रात्रिः रात्रिबली आदौ चतुष्पात् राशिपूर्वार्धे चतुष्पदत्वं ज्ञेयं उत्तरार्धे जलचरत्वमिति अग्रे
वक्ष्यति विषमोदयः विट् वैश्यवर्णः अयं ग्राम्यगः ११ अथ कुंभस्वरूपमाह कुम्भ इति १२ अपदः चरणरहितः नापुरुषराशिः
दिने दिवाबली मध्यसंगप्रसूः मध्यमः स्त्रीसंगः मध्यमप्रसवश्च स्थिरः स्थिरराशिः कर्बुरश्चित्रवर्णः वन्योऽरण्यचारी वायुः वायु
राशिः स्निग्धः चिक्कणः अल्पः स्वरः स्वरोऽल्पस्वरः तल्पधातुः समवातपित्तकफप्रकृतिः शूद्रः शूद्रवर्णः प्रतीची पश्चिम
दिक्स्वामी विषमोदयः उग्रः क्रूरः अयं ग्राम्यगः १२ ॥ ४१ ॥ ७

म्य पुनः किं कृत्वा अनन्तदैवज्ञाख्यगुरोः पदाम्बुजं प्रणम्य १ अथ द्वादशराशिस्वरूपमाह तत्रादौ मेषस्य प्रमानिति २ पुमान् पुरुषरा
शिः चरः चरसंज्ञकः अग्निः अग्निराशिः सद्दृष्टोदृष्ट्याङ्गः चतुष्पात् चतुश्चरणः रक्तः आरक्तवर्णः उष्ण उष्णस्वभावः पित्तः पित्तस्वभावः
प्रतिरवो महाशब्दः अद्रिः पर्वतचारी उग्रः क्रूरः पीतः पीतवर्णः दिने दिवाबली प्राक् पूर्वदिक्स्वामी विषमोदयः अल्पसंगप्रजः अल्प
३४ स्त्रीसंगः अल्पप्रजश्च रूक्षः कान्तिरहितः नृपः क्षत्रियवर्णः समः समाङ्गः अजः मेषः एवं मेषो विशिष्टो ज्ञेयः अयं राशिर्द्विवर्णः आरक्तव
र्णः पीतवर्णश्च मेषसिंहधनिनामेव वर्णद्वयमुक्तं कुतः समरसिंहेनोक्तत्वात् २ अथ वृषराशिस्वरूपमाह वृष इति ३ स्थिरः

ॐ स्वस्ति श्रीगणेशाय नमः प्रणम्य हेरम्बमथो दिवाकरं गुरोरनन्तस्य तथा पदाम्बुजम् श्रीनीलकण्ठो विविनक्ति
सूक्तिभिस्ताजिकं सर्वमनःप्रसादकृत् १ पुमांश्चरोग्निः सदृष्टश्च तुष्पात्क्रोष्ण पित्तातिरवोद्रिरुग्रः पीतो दिने प्रा
ग्विषमोदयोल्पसंगप्रजो रूक्षनृपः समोऽजः २ वृषः स्थिरः स्त्री क्षितिशीत रूक्षो याम्येड् भूमर्ववीयुनिशाचतुष्पात्
श्वेतोतिशब्दो विषमोदयश्च मध्यप्रजासंगशुभोपि वैश्यः ३ ॥

स्थिरसंज्ञकः स्त्री स्त्रीराशिः क्षितिर्भूमिराशिः शीतः शीतस्वभावः रूक्षः कान्तिरहितः याम्येड् दक्षिणदिक्स्वामी भूमः स्वस्तु
भूमिचारी वायुर्वातप्रकृतिः निशा रात्रिबली चतुष्पात् चतुश्चरणः श्वेतः शुभ्रवर्णः अतिशब्दः महाशब्दः विषमोदयः
मध्यप्रजासंगः मध्यमप्रजः मध्यमस्त्रीसंगश्च शुभः सौम्यः वैश्यः वैश्यवर्णः अयं पृथ्यागः मेषसिंहधनिनामेव हृदृष्ट्याङ्ग
त्वमुक्तम् अर्थादितरेषां पृष्ठ्याङ्गत्वं बोध्यम् ३ ॥ ५ ॥

अथ ऽत्र राशिस्वरूपस्य फलकथनार्थं संक्षेपेण किंचित्स्वरूपमनुवदन्नाह पित्तेति १५ मेषः पित्तं वृषोऽनिलो वा युग्मः मिथुनः धातुसमः
वातपित्तकफात्मकः कर्कः कफी तथा सिंहः पित्तं कन्यानिलः तुला धातुसमः वृश्चिकः कफी एवं धनुः पित्तं मकरोऽनिलः कुं-
भो धातुसमः मीनः कफीति मेषतः मेषमारभ्य मीनपर्यन्तं चतुष्कं चतुष्कं कृत्वा त्रिस्त्रिरावृत्तं भवति एते राशयः सूरिभिः पंडितैरूहनी-
या ज्ञातव्याः तथा राजन्यविट्शूद्रविप्रास्तद्वर्णा द्वादशराशिषु त्रिरावृत्तिर्ज्ञातव्या यथा च मेषः राजन्यः क्षत्रियवर्णः वृषो विट् वैश्यवर्णः
मिथुनः शूद्रवर्णः कर्कः विप्रः ब्राह्मणवर्णः तथा सिंहः क्षत्रियवर्णः कन्या वैश्यवर्णः तुला शूद्रवर्णः वृश्चिको ब्राह्मणवर्णः एवं धनुः क्ष-
त्रियवर्णः मकरो वैश्यवर्णः कुंभः शूद्रवर्णः मीनो ब्राह्मणवर्णः एतेषां सर्वफलं राशयः तत्सारतः राशिस्वरूपस्य शुभफलं स्यादित्यर्थः अथ
गणितेन वक्ष्यति तत्रादौ ग्रहाणां चालनं वक्ष्यति तच्चालनं वर्षप्रवृत्तिरूपेति सा च ग्रन्थकृता ऽत्र नोक्ता वर्षतन्त्रे ऽत्र कृतत्वात् सा त्वस्मा-

पित्तानिलौ धातुसमः कफश्च त्रिर्मेषतः सूरिभिरूहनीयाः राजन्यविट्शूद्रपराह्वराश्च सर्वं फलं राशयतस्तु सारतः स्यात् १५ गताः
समाः पादयुताः प्रकृतिघ्नसमागणान्तु खवेदा ४० घटीयुक्ता जन्मवारादिसंयुताः १६ अब्दप्रवेशो वारादि सप्तनष्टे च निर्दिशेत्

भिरत्रोपयुक्तत्वात्प्रदर्श्यते अन्यच्च वर्षेशनिर्णयदशाः अन्तर्दशा मासप्रवेशादिनप्रवेशादिकमत्रोपयुक्तं तत्तु वर्षतन्त्रे प्रद-
र्शितमिति नात्र प्रदर्शितम् अत्र तु अस्माभिर्यत्र यस्योपयोगस्तत्तत्प्रदर्श्यते अत्र वर्षफलसाधनार्थं वर्षप्रवृत्तिसमय-
माह गता इति सार्धेन १६ गताः समाः गतवर्षाणि तद्यथा जन्मकालिकः शाको वर्तमानशाकाच्छोध्यः शेषं गतसमाः ताः पा-
दयुताः स्वचतुर्थांशेन युक्ताः कार्याः प्रकृतिरेकविंशतिः २१ तद्गुणितो यः समागणो वर्षगणः तस्मात् खवेदा
४० भक्तघटीयुताः चत्वारिंशता ४० भक्तात् घटादि यल्लब्धं तेन चतुर्थांशयुक्तसमा युताः कार्याः ततो जन्मवारादि जन्मका-
लिकवारघटीपलैः संयुताः कार्याः तदनन्तरं ऊर्ध्वांके सप्ततष्टे सप्तभिर्भक्ते यच्छेषं तत् अत्रास्मिन्ग्रन्थे अब्द-
प्रवेशो वर्षप्रवेशो वारादि वारघटीपलात्मकं निर्दिशेत् अत्र वर्तमानो वारो ज्ञेयः ॥ १६ ॥ ४

अथ कन्याराशिस्वरूपमाह पांडुरिति ७ कन्यारूपमेतादृशं पांडुः पिंगलवर्णः द्विपात् द्विचरणः स्त्रीराशिः द्वितनुः द्विस्वभावा चरस्थिर
स्वभावात्मिका याम्याशा दक्षिणादिक्स्वामी निशारात्रिबली मरुद्वायुप्रकृतिः शीताशीतलस्वभावा समोदया स्यात् मिराशिः अर्थ
शब्दात् वर्जितशब्दा शुभभूमिः शुद्धभूमिचारिणी वैश्या वैश्यवर्णा वृत्ताकोतिहिता अल्पसंगप्रसवा अल्पसंगमा अल्प
प्रसवा च शुभा सौम्या राशिः चकारः समुच्चयार्थः अयं श्लोकयोगः ७ अथ तुलराशिस्वरूपमाह पुमानिति ८ पुमान् क्रूरराशिः
चरः चरसंज्ञकः चित्रो नानाविधवर्णः समोदयः उग्रः प्रत्यक् पश्चिमदिक्स्वामी मरुत् वायुप्रकृतिः स्निग्धरवः चिक्कणशब्दः ।

पाण्डुर्द्विपात्स्त्री द्वितनुर्यमाशा निशा मरुच्छीतसमोदया स्यात् कन्यार्थशब्दा शुभभूमिवैश्यवृत्ताल्पसंगप्रसवा
शुभा च ७ पुमांश्चरश्चित्रसमोदयोग्रः प्रत्यङ्मरुत्स्निग्धरवोऽनवद्यः स्वल्पप्रजासंगमशूद्रउग्रस्थलोग्रवीर्यो
द्विपदः समानः ८ स्थिरः सितः स्त्री जलमुत्तराशा निशारवोनो बहुपात्कफी च समोदयो वारिचरोतिसंगप्रजः शु
भः स्निग्धतनुर्द्विजोलिः ९ ॥

स्वल्पप्रजासंगमः स्वल्पप्रजः स्वल्पस्त्रीसंगमः शूद्रः शूद्रवर्णः उग्रः क्रूरः युवीर्यो दिवाबली द्विपदो द्विचरणः समानः
समागः अयं श्लोकयोगः ८ अथ वृश्चिकराशिस्वरूपमाह स्थिर इति ९ स्थिरः स्थिरसंज्ञकः सितः शुभ्रवर्णः स्त्री स्त्रीरा
शिः उत्तराशा उत्तरदिक्स्वामी निशारात्रिबली रवोनः निःशब्दः बहुपात् बहुचरणः कफी कफप्रकृतिः समोदयः वारि
चरो जलचरः अतिसंगप्रजः बहुस्त्रीसंगः बहुप्रजश्च शुभः सौम्यः स्निग्धतनुः चिक्कणतनुः द्विजः ब्राह्मणवर्णः अलिः वृश्चिक
राशिः एतादृशो ज्ञेयः अयं श्लोकयोगः ९ ॥

तत्कालीनरविणासहतत्त्वोऽशविर्यस्मिन्मासे भवति स एव वर्षप्रवेशमासो ज्ञेयः संवत् १९५८ शाके १८२३ माघकृष्णसप्तमी ७ सो
मे घटी ५२ पले ५३ हस्तनक्षत्रघटी ९ पले २८ सुकर्मयोगघटी ३० पले २८ अस्मिञ्छुभदिने सूर्योदयादिष्टघटीषु १२ पलेषु १८
विपलेषु ३० वर्ष १८ प्रवेशः अथैतद्वर्षप्रवेशसमये प्रमाणमाह तत्कालइति १० यतो यस्मात्कारणात् तत्काले वर्षप्रवेशस
मये करणोक्तरीत्या साधितः सूर्यो जन्मकालीनरविणा समस्तुल्यो राश्यंशकलाविकलात्मको भवति इदमेव वर्षप्रवेशसम
ये प्रमाणं अस्योदाहरणमग्रे प्रदर्श्यते गणेशादैवज्ञैः स्वकृततताजिकभूषणे वर्षप्रवेशकालीनसूर्यो जन्मकालीनसूर्येण स
हविकलासंतुल्यो नायाति इति ज्ञात्वा वर्षप्रवेशसमये अन्यः संस्कारोऽप्युक्तः तद्यथा क्वचित् शाके जन्मशाकोनिते भवति यच्छेषं
गताब्दसंज्ञो योऽयं संगुणितः शरैस्खयुगलेनोगो ५।२।१९ युगे ४ र्भाजितः लब्धं तज्जननेत्थवारघटिकाद्येनान्वितसप्तभिः पूर्वोक्त
विधिनैव प्रोक्तमितो वर्षप्रवेशो ध्रुवः १ वर्षप्रवेशोऽस्य घटीपलाद्ये काले किल स्पष्टतरः सन्न तत् भानुर्जनेर्भानुसमान एष।

तत्कालेऽर्को जन्मकालरविणा साधितः समः १० ॥

सिद्धान्तरीत्या परिसाधनीयः २ जन्मकालतनलिप्तीविलासिनानैव याति तुलितांकुलाश्च चेत् वर्षकालतनलिप्तीपतिस्तयो
रंतरं गतिहृतं शतोन्नितम् ३ कार्यवर्षध्रुवे तस्मादसौ स्पष्टः प्रजायते तत्कालसंभवैः खेटैर्भावैश्च फलनिर्णयः ४ अ
थ गणेशादैवज्ञानां संदेहहरीकरणार्थं जन्मकालीनसूर्यसमवर्षप्रवेशकालीनसूर्यस्य विकलात्मकसाम्यप्रदर्शना
र्थमुदाहरणं प्रदर्श्यते जन्मसमये सिद्धान्तरहस्यादहर्गणः २१२८ चक्रं ८ सूर्योदये मध्यमोऽर्कः ९।८।०।४३ देशांतरविक
लाभिः २२ युतः ९।८।१।५ इष्टघटीभिः ३०।४३ चालितस्तात्कालिकोऽर्कः ९।८।४५।२५ मंदकेंद्रं ५।११।२४।३५ मंदफलं धनं ०।
४२।२३ संस्कृतोऽर्कः ९।९।२७।४८ अयनांशाः १९।४५ चरखंडकानि ५५।४० १२५ चरंधनं २३८ संस्कृतः जातो जन्मसमये
स्पष्टोऽर्कः ९।९।३०।१९ अथ वर्षप्रवेशसमये सिद्धान्तरहस्यादहर्गणः ३५९५ चक्रं ९ सूर्योदये मध्यमोऽर्कः ९।३।९।३२।
५८ देशांतरविकलाभिः २२ युतः ९।९।३३।२० इष्टघटीभिः १२।१८।३० चालितो जातस्तात्कालिकोऽर्कः ९।९।४५।२२ मंद८

अथमीनस्वरूपमाह मीनइति १३ मीनराशिरेतादृशोज्ञेयः अपदश्चरणरहितः स्त्रीस्त्रीराशि कफः कफप्रकृतिः वारिजलराशिः वात्रिः रात्रिवली निःशाद्वः शाद्वरहितः बभ्रुः पिंगलवर्णः हितनुश्चरस्थिरद्विस्वभावात्मकः जलस्थः जलचरराशिः स्निग्धस्त्रिकणः अतिसंगप्रसवः अत्यंतस्त्रीसंगः अत्यंतप्रसवश्च अपिशब्दः समुच्चये विप्रोब्राह्मणवर्णः शुभः सौम्यः अंत्यराशेः उत्तरदिक्स्वामी द्विषमोदयः उभयोदयः १३ एवंराशिस्वरूपमुक्त्वेदानीं राशीनां मित्रामित्रविभागमाह धराम्बुनोरिति १४ धराम्बुनोः पृथ्वीराशिजलचरराश्योर्वर्गे सुहृत्त्वं मित्रत्वं एवमग्निसमीरयोः अग्निराशिवायुराश्योर्वर्गेपि मित्रत्वं ज्ञेयं परतः एतद्वैपरीत्ये

मीनोपदः स्त्रीकफवारिरात्रिर्निःशब्दबभ्रुर्हितनुर्जलस्थः स्निग्धोति
संगप्रसवोपिविप्रः शुभोन्त्यराशेर्द्विषमोदयश्च १३ धराम्बुनो
रग्निसमीरयोश्च वर्गे सुहृत्त्वं परतोरिभावः चापान्त्यभागेस्य चतुष्पद
त्वं ज्ञेयं मृगान्त्यस्य जलेचरत्वम् १४ ॥

अरिभावः शत्रुभावः एतदुक्तं भवति पितापुत्रयोः स्त्रीपुरुषयोर्वा स्वामिसेवकयोर्वा अन्ययोर्वायस्यकस्यापि मैत्रीविचारे पृथ्वीराशिजलराशिसंबन्धत्वे मित्रत्वं वक्तव्यं एवमग्निराशिवायुराशिसंबन्धत्वे मित्रत्वं वाच्यं अन्यथा शत्रुत्वं यथा मृषभ्योर्मृग मेषकन्ययोः मेषधन्वोः अंबुवायोर्वर्गत्वे शत्रुत्वं यत्रद्वयोरेकएवपृथ्व्यादिवर्गः स्यात्तत्र द्वयोः परस्परमतिप्रीतिरित्यर्थतः सिद्धं अथराशिस्वरूपकथनावसरेधनुर्मकरयोरनुक्तं किंचित्स्वरूपविशेषं सिंहावलोकनन्यायेनाह चापेति चापस्यधनुषः अन्त्यभागेऽन्त्यार्धे चतुष्पदत्वं ज्ञेयम् मृगस्य मकरस्य अन्त्यभागे उत्तरार्धे जलचरत्वं ज्ञेयम् १४ ॥ ११

अथ पंचांगस्थनक्षत्रचन्द्रानयनमाह खषड्भमिति ॥१९॥ वर्षप्रवेशसमये यन्नक्षत्रं भवति तस्य नक्षत्रस्य इष्टकालावधि भुक्तघटिकाः कार्याः
ताः षष्ट्या ६० गुण्याः भभोगो ह्रुतं तेन नक्षत्रस्य गतैष्ययोगेन भाज्या यल्लब्धं तत् षष्टिगुणिता स्विन्यादिगतनक्षत्रेषु युक्तं हि दिनिघ्नेताः अश्विन्या
दिनक्षत्रादिष्टघटीपर्यन्तं घटिका भवन्ति ता नवभिर्भाज्याः लब्धमंशाः शेषं षष्ट्या गुणं पुनः नवभिर्भाज्यं लब्धं कला पुनः शेषं षष्ट्या गुणं
नवभिर्भाज्यं लब्धं विकलाः एवं राश्यादेः भागस्वैशादिकस्तात्कालिकः स्यात् उदाहरणम् वर्षप्रवेशसमये हस्तनक्षत्रं तस्य पूर्वदि
ने भुक्तघटिकाः ४१।२४ एताः इष्टघटीभिः २२।१८ युक्ता इष्टघटीपर्यन्तं हस्तनक्षत्रस्य भुक्तिघटिकाजाताः ५३।४२ एताः षष्ट्या गुणिताः
३२२२ नक्षत्रगतैष्ययोगेन ५८।५२ भक्ताः सवर्णिते भाज्य १९ ३३ २० भाजको ३५३२ भजनाल्लब्धं ५४।४४।१ अश्विन्यादिगतनक्षत्रप
र्यन्तं संख्या १२ षष्ट्या ६० गुणिता ७२० पूर्वलब्ध्या ५४।४४।१ युक्ता ७७४।४४।१ हि द्विगुणिता १५४९।२८।२ नवभिर्भक्ता लब्धम
॥ अथ गतिसाधनम् खखाभ्राष्टवेदाः ४८००० भभोगेन नक्षत्रस्य गतैष्ययोगेन भक्ताः चंद्रस्य कलादिकास्पष्टा भुक्तिगतिः स्यात् ५ त्रुटिः ४ ४

खषड्भयान्तं भभोगो ह्रुतं तत्तत्वतर्क ५९ त्रुटिल्पेषु युक्तं हि द्विनिघ्नं मूनगा ॥१८॥ दंशाद्याभागपूर्वे स्वभुक्तिः खखाभ्राष्टवेदा ४८००० भभो
गेन भक्ता १९ पूर्वं नतं स्यादिनरात्रिखण्डे दिवा निशोरिष्टघटी विहीने दिवा निशोरिष्टघटी ष्यु इष्यु रात्रिखण्डे त्वपरे नतं स्यात् २०॥

श्यादिकं ५२।१९।४२ अंशाः त्रिंशता ३० भक्ता जातस्तात्कालिको राश्यादिश्चन्द्रः ५।२२।१९।४२ अथ गत्यानयनं खखाभ्राष्टवेदाः ४८०००
नक्षत्रस्य गतैष्ययोगेन ५८।५२ भक्ता लब्धा कलादिका चंद्रस्य स्पष्टा गतिः ८१५।२४ उक्तरीत्या साधिता जातास्तात्कालिकाः स्पष्टग्रहाः
अथ भावसाधनमाह तत्र लग्नसाधनमिष्टकालाधीनं दशमलग्नसाधनं नतोन्नताधीनं तत्रादौ नतोन्नतज्ञानमाह पूर्वमिति २० दिनखण्डे

	सू	चं	मं	बु	जी	शु	श	रा	के
स्पष्टाः	९ १ १० २६	५ २३ ३ ५०	८ १४ १६ २२	८ १२ १६ ८	८ २८ २३ १६	७ २४ १७ ३८	६ १८ ४८ ५४	२ २ २४ १८	८ २ २७ १८
स्पष्टगति	५९	८५	४४	५१	४३	७०	२	३	३
	१२	२४	२	२३	५०	१०	२४	११	११

दिनार्धे दिनगतघटीभिः हीनं कार्यं दिने पूर्वनतं स्यात् एवं रात्रिखण्डे रात्र्यर्धं रात्रिगतघटीभिर्हीनं का
र्यं रात्रौ पूर्वनतं स्यात् तल्लक्षणं दिनार्धात् पूर्वमिष्टकाले सति यदा दिनार्धादपरिइष्टकाले सति तदा
र्धं दद्यादिष्टघटी ष्यु इष्यु शेषं ध्रुवं दिनार्धे दिवसे अपरं नतं पश्चिमनतं स्यात् यदा रात्र्यर्धादपरि
इष्टकालस्तदा सूर्यास्तादिष्टघटी शुद्ध्या रात्र्यर्धं रात्रौ पश्चिमनतं स्यात् २० ॥ ११॥

६

अथतिथिसाधनमाह शिवघ्न इति १० अब्दः गतवर्षगणः शिवघ्नः एकादशभि ११ र्गुणः खखखाङ्गेन्दुलवाढ्यः स्वकीयोयः सप्तत्यधिकशतभा
गः तेनाढ्यः युक्तः कार्यः जन्मतिथ्यन्वितः शुक्लप्रतिपदमारभ्य जन्मकालीनवर्तमानतिथिभिरन्वितो युक्तः खाग्निशेषितः त्रिंशताभक्तः त
त्रतिथौ तस्मिन्नेवमितितिथ्यावृद्धप्रवेशान्तवर्षप्रवेशो भवति अस्यांतिथौ वर्षप्रवेशो भवतीति नियमो नास्ति कदाचित्पूर्वतिथौ अ
ग्रिमतिथौ च भवति अत्रवास्येवप्रमाणं तिथित्रयस्य मध्ये यस्यां तिथौ पूर्वानीतवारो भवति साएवप्रवेशतिथिर्ज्ञातव्या यत्र कु
त्रापिशेषितः तष्टः एवमन्द्वा(?)आयाति तत्रलब्धेस्यागः शेषस्य ग्रहणमिति निश्चितं ज्ञातव्यं अथोदाहरणक्रमो लिख्यते तत्रादौ
कस्यचिज्जन्मसमयो लिख्यते संवत् १६४८ शाके १५१३ माघशुक्लप्रतिपत् १ बुधे घटी ३६ श्रवणनक्षत्रघटी ५४ वज्रयोगघ
टी ६ अस्मिन्शुभदिने सूर्योदयाद्गतघटीषु ३० पलेषु ५३ तथा रात्रिगतघटीषु १२ पलेषु ३१ जन्म अत्रभा ७।३० देशान्तस्यो
जनातिथनाति(?) सूर्यः ९।०७।३।०६ जन्मलग्न ५।१०।५३।५० अत्रवर्षप्रवेशस्योदाहरणं तत्रजन्मकालीनशाकः १५१३ वर्तमानशाकात् १५५०

शिवघ्नोऽब्दः खखखाङ्गेन्दु १०·लवाढ्यः खाग्निशेषितः जन्मतिथ्यन्वितस्तत्रतिथावब्दप्रवेशनम् ॥

शेषितः शेषांकप्रमितो जातो गतवर्षगणः ३७ अयं स्वचतुर्थांशेन ९।१५।० युक्तः ४६।१५।० वर्षगणः ३७ एकविंशतिभि २१ र्गुणितो जातो
यमंकः ७७७ अयं चत्वारिंशता ४० भक्तः लब्धं घटीपलात्मकं १९।२५।३६ एतत्तद्चतुर्थांशयुक्तेसमागणे ४६।१५।० घटीयुतं जाते ६५।
४०।२५।३६ एतज्जन्मवारादिना ५।३०।५३ युतं जातो यमंकः ५।११।२।१८।३६ अत्र शेषे सप्त ७ तष्टः शेषं वर्षप्रवेशो वारादि २।११।१८।३६ अ
थतिथ्यानयने गतवर्षगणः ३७ एकादशभि ११ र्गुणितः ४०७ अयं स्वकीयसप्तत्यधिकशत १७० भागेन २ युक्तः ४०९ अयं ज
न्मकालीनशुक्लप्रतिपदमारभ्यवर्तमानतिथिभिर्युक्तः ४११ त्रिंशता ३० तष्टः शेषं २१ प्रमिता जाता वर्षप्रवेशे कृष्णपक्षे षष्ठी अ
स्यांतिथौ पूर्वानीतवारो नास्ति अग्रिमतिथौ वर्तते इति कारणात् अस्यांतिथौ २१ एक १ युक्तः २२ जाता कृष्णपक्षे सप्तमी अ
त्रयस्मिन्मासे जन्म भवति तस्मिन्मासे वर्षप्रवेशो ज्ञेयः कदाचिज्जन्ममासात् पूर्वमासे अथवा अग्रिममासे च भवति तस्य प्रमाणं वक्ष्यते ज

षष्ठांशयुक्तो द्वितीयतृतीयभावयोः संधिः स्यात् अयं षष्ठांशयुक्तस्तृतीयभावः स्यात् अयं षष्ठांशयुक्तस्तृतीयचतुर्थभावयोः संधिः स्यात् एवं त्रयः
संधयो भावा जाताः तदनन्तरमग्रे त्रयः संधयो भावाः साध्याः तद्यथा रवीनीतषष्ठांशोनत्र्युपमध्ये संशोध्य अनेन राश्यादिना सुखभावो युक्तश्चेत्
तुर्यपंचमभावयोः संधिः स्यात् अयमेव संधिः पुनस्तेन युक्तः पंचमभावः स्यात् अयं तेन युक्तः षष्ठसप्तमभावयोः संधिः स्यात् एवं षट् संध
यो भावा जाताः एते भाईयुक्ता भार्धं षड्राशयः तैर्युक्ताः सन्तः अवशिष्टषड्भावाः ससन्धयः स्युः एवं भावसंधिनिष्पत्तेः प्रयोजनमाह खेटइ
ति २६ यो ग्रहः यद्भावस्थो भवति स चेद्भावस्य राश्यंशकलाविकलाभिस्तुल्यः स्यात् तदा स ग्रहस्तद्भावसम्भूतं सम्भूतं वा फलं पूर्णं
विंशतिविंशात्मकं ददाति संधितुल्ये ग्रहे स्वल्पफलं भवति अथ सूर्यस्य भुक्तम् यद्वा भोग्यं उक्तरीत्यावानीतं तद्यदीष्टकालपले
भ्योनस्यादिति तदा केनोपायेन लग्नसाधनं कर्तव्यमित्यत आह भुक्तमिति भुक्तं भोग्यं यदा इष्टनाडीपलेभ्योनस्यात्तदा इष्टनाडीपलानि त्रिं

षष्ठांशयुक्तस्तनुः संधिरग्रे षष्ठांशयोजनात् त्रयः ससन्धयो भावाः षष्ठांशोनैकयुक्तखात् २५ अग्रे त्रयः षडेवान्ते भार्धयुक्ताः
परेऽपि षट् खेटे भावसमे पूर्णफलं संधिसमे तु खम् २६ भुक्तभोग्यं स्वेष्टकालान्न शुद्ध्येत् त्रिंशन्निघ्नाज्जोदयाप्तं लवाद्यम्
हीनं युक्तं भास्करे तत्तनुः स्याद्रात्रौ लग्नं भाईयुक्ताद्रवेः स्यात् २७ ॥

त्रिंशद्गुणितानि कार्याणि सायनसूर्यस्य राश्युदयेन भाज्यानि फलं लवाद्यं प्राप्यं हीनं युक्तं भास्करे कार्यं तद्यथा यदा रवेर्भुक्तमा
नीतं भवति तदा लवाद्यं फलं सूर्यमध्ये हीनं कार्यं यदा भोग्यमानीतं भवति तदा लवाद्यं फलं सूर्यमध्ये युक्तं कार्यं तत्तनुलग्नं स्या
त् रात्रौ लग्नसाधनं चेत् क्रियते तदा राशिषट्कयुक्तात् रवेः सकाशाल्लग्नं साध्यं रात्रौ दशमलग्नसाधनेऽपि राशिषट्कयुक्तात् रवेः सकाशात्
भुक्तं भोग्यं साध्यं अथोदाहरणम् अस्य जन्मनि सौरोदये तात्कालिकोर्कः ९।२।३।१४ अयनभागाः १८।२९ युक्तः ९।२१।५१।१६
अस्य भोग्यांशाः ८।३।५५ मकरस्योदयः २९८ गुणितः १२५२।५२।१२ अयं त्रिंशद्भक्तः जातो भोग्यकालः ४१।४३।४४ अथ मिष्टना
डी २२।१८।३० पलेभ्यः ५६।३० शोधिते शेषं ९९९।८।२।४८ मकरादग्रे कुम्भोदयः २३९ शोधाद्यो शोधिते शेषं ४५७।१६।१९ कुम्भादग्रे मीनो ॥४

केन्द्रं ५।११।४।११ मंदफलं धनं ०।४२।२३ संस्कृतोर्कः ०।०।२७।५० अयनांशाः १८।२९ चरखंडकानि ३५।६।१४ चरं धनं १६९ संस्कृतो जातो वर्ष
प्रवेशसमये स्पष्टोर्कः ०।०।३।१९ अयं वर्षकालीनः सूर्यः पूर्वानीतजन्मकालीनसूर्येण सह तुल्यो जात इति एतेन दैवज्ञगणेशमतं निर
स्तं यदि वर्षप्रवेशोक्तेष्टघटीभिः पंचांगस्थितसूर्यस्य चालनं दत्त्वा जन्मकालीनसूर्येण सह कलास्तु तुल्यता नायाति इति हेतोः वर्ष
प्रवेशघटिकास्तु अन्यः संस्कारोपयुक्तः इति चेदुच्यते तत्रापि हेतुरुच्यते सौरः ब्राह्मः आर्ष इति पक्षाणां परस्परमन्तरमस्ति जन्मकालीन
सूर्यपंचांगस्थितसूर्ययोरन्तरं पतति एकपक्षमंगीकृत्य उभयोः साधनं चेत्क्रियते तदान्तरं न पतति ननु सौरपक्षाज्जन्मकालीनसूर्यः
साधितः सौरपक्षात्पंचांगस्य सूर्योपि वर्तते तत्राप्यन्तरं पततीति चेदुच्यते तत्रापि हेतुरुच्यते येन यस्य कस्यापि जन्मसमये ग्रहसा
धनं क्रियते तेन यस्य यस्मिन्ग्रामे जन्म तद्ग्रामस्य चरदेशान्तरसंस्कारः क्रियते येन यद्ग्रामस्य पंचांगं क्रियते तेन तद्ग्रामस्य चरदे
शान्तरसंस्कारो ग्रहेषु क्रियते ग्रामे ग्रामे चरदेशान्तरे भिन्ने भिन्ने इति कारणादन्तरं पतति उभयोरेकदेशस्य संस्कारश्चेत्क्रिय

गतैष्यदिवसाद्येन गतिर्निघ्नी खषड् ६० हृता लब्धमंशादिकं शोध्यं योज्यं स्पष्टो भवेद्ग्रहः १८ ॥ ~ ॥

ते तदान्तरं सर्वथैव न पतति यस्मात् कृत्यात् साधितः सूर्यो जन्मकालीनो यावद्भिः संस्कारैः संस्कृतो भवति तावद्भिः संस्कारैः सं
स्कृतः तस्मात् कृत्या वर्षप्रवेशसमये साधितः सूर्यो विकलात्मकस्तुल्यो भवतीति निश्चितं अत्रार्थे पूर्वमेवोदाहरणं प्रदर्शितं अ
स्य यावदीत्या ह्रयोस्तुल्यता भवतीति ज्ञात्वा दैवज्ञचक्रचूडामणिभिः श्रीकेशवदैवज्ञैराचार्यैर्नान्यः संस्कारो वर्षप्रवेशसमये प्रयुक्तः
गणेशदैवज्ञैर्यदुक्तं तदसत् १७ अथ वर्षप्रवेशसमये स्पष्टा ग्रहाः साध्याः तत्रापि स्वार्थपंचांगस्थितग्रहेषु चालनमाह गते
ष्येति १८ गतैष्यदिवसैः कृत्वा ग्रहस्य कलिकादिका गतिर्गुणा खषड्भि ६० र्भाज्या लब्धमंशादिकमंशकलाविकलात्मकं
पंचांगस्थितग्रहे शोध्यं योज्यं वा यदा गतमंतरं तदा शोध्यं यदा त्वेष्यमंतरं स्यात्तदा योज्यं स तात्कालिकः स्पष्टग्रहो भवेत् वक्रगते
ग्रहस्य राहुकेत्वोश्च चालनं मार्गग्रहापेक्षया विपरीतं ज्ञेयं उदाहरणं वर्षप्रवेशवारादिकमध्ये अवधिस्थवारादिना ६।११
५९ शोधिते एतच्चालनांकाः ।२।५८। २२ अनेन सर्वे ग्रहाश्चालनीयाः १८ ॥

नी॰ कं॰ टी॰ ८

सकाशाद्ग्रहे हीने सति यद्भावो वर्त्तते तद्भावात् सर्वभावस्य फलं ददाति यदा विरामसंधेः सकाशाद्ग्रहेऽधिके भवति तदाऽग्रिम भावस्य फलं ददाति २८ अथ ग्रहाणां विंशोपका भावफलमाह ग्रहेति २९ उदाहरणमेव व्याख्या सूर्यः ९।१८।३०।१९ अस्य संधिः ९।२२।१७।१९ अनयोरन्तरं ०।४।४७।०।१३ विंशत्या २० गुणिते २९।५।४४।२० भावः ९।१५।१८।० संधिः ९।२२।१७।१९ अनयोरन्तरेण २।१९।१९ भजेत् सवर्णिते भाज्यः २०६४६।९० भाजकः ६१२५९ भाजकेन भक्ते भाज्ये यत् फलं तदेव विंशोपकाः स्मृताः २।१४ एवं चंद्रादीनां अथ रव्यादीनां विंशोपकाः तकानि भावफलानि २९ अथ ग्रहाणां बले वक्ष्यति तत्र ग्रहबलमधिकारं विना न भवति तच्चाधिकाराः पञ्च यथा स्वगृहे त्रोच्चे हद्दा त्रैराशिक स्वमुसल्लहं चेति अधिकारं विना ग्रहो न बली तत्रादौ राशीशाः द्रेष्काणेशानाह भौमेति ३० मेषस्य भौमः वृषस्य शनिः शुक्रः मिथुनस्य सौम्यो बुधः कर्कस्य शशी चंद्रः सिंहस्येनः सूर्यः कन्याया विद् बुधः तुलायाः सितः शुक्रः वृश्चिकस्यारो भौमः धनुषः ज्योगुरुः मकरस्यार्किः शनिः कुंभस्य मंदः शनिः मीनस्याङ्गिरा गुरुः एते गृहेश्वरा द्वादशराशीनां स्वामिनो भवन्ति अथ द्रे

सू	चं	भौ	बु	जी	शु	श
१७	१०	१२	१५	११	३	६
१४	११	१३	३५	२१	१२	५२

ग्रहसन्ध्यन्तरं कार्यं विंशत्या गुणितं भजेत् भावसंध्यन्तरेणाप्तं फलं विंशोपकाः स्मृताः २९ भौमोऽशनिः सौम्यः शशी नु विल्लितारेज्यार्कि मंदाङ्गिरसो गृहेश्वराः आद्याः कुजार्यारवितोऽपि मध्यमाः सितात्तृतीयाः क्रियतो द्रेक्काणपाः ३० सूर्यादितुंगर्क्षमजो क्षनक्र कन्या कुलीरात्र्तुलाल्लवैः स्युः दिग्भिर्गुणैरष्टयमैः शरैः कैर्भैर्नभैः संख्येनखैः समितैश्च ३१ ॥ ॥

द्रेक्काणस्वामिन उच्यंते आद्या इति राशेस्त्रिंशत्तीयांशो दशांशात्मको द्रेक्काण उच्यते एकस्मिन्राशौ त्रयो द्रेक्काणाः अथैकस्मिन्राशौ कियन्तो द्रेक्काणा इति विचार्य प्रथमस्यार्थे हि भौमात् द्वितीयस्य रवेः तृतीयस्य शुक्रात् अन्ये पारीत्या क्रियतो मेषादि द्वादशराशिषु द्रेक्काणपा द्रेक्काणस्वामिनो भवन्ति द्रेक्काणचक्रं अथ ग्रहाणां स्वतुंगराशीन्भागांश्चाह सूर्यादीति ३१ सूर्यादीनां ग्रहाणां तुंगं उच्चराशिर्मेषः सूर्यस्य अजः मेषः उच्चं दिग्भिर्दशभिरंशैः चंद्रस्य उक्षो वृषः गुणैस्त्रिभिरंशैः भौमस्य नक्रो मकरः अष्टयमैः अष्टाविंशतिभागैः बुधस्य कन्या उच्चं शरैः पंचदशभिरंशैः गुरोः कुलीरः कर्कः उच्चं भैः तैः पंचभिरंशैः शुक्रस्य मीन उच्चं

	मे	वृ	मि	क	सिं	कं	तु	वृ	धं	म	कुं	मी	
१०	भौ	बु	जी	शु	श	सू	चं	भौ	बु	जी	शु	श	सू
२०	सू	चं	भौ	बु	जी	शु	श	सू	चं	भौ	बु	जी	
३०	शु	श	सू	चं	भौ	बु	जी	शु	श	सू	चं	भौ	

स्वोदयाद्यातत्तट्टीकुभोग्यैर्दिवा व शेषे सरव्यार्कभुक्तैः निशागतैर्भार्द्ध ६ युतार्कभोग्यैर्निशाव शेषे रविभुक्तभागैः गतागतैराश्युदयैः स्वयुक्त्या लग्नं यतर्णीसममेव भूयात्

अथ समभिः चोकैर्भावसन्धिसाधनमाह तत्कालइत्यादिना २२ तात्कालिकोर्कः अयनांशैर्युक्तः कार्यः तस्य भुक्तभोग्यांशा स्वगुणादिति यदा कालग्नसाध नं क्रियते तदा भुक्तांशा ग्राह्याः यदा धनलग्नसाधनं क्रियते तदा भोग्यांशा ग्राह्याः तैः स्वोदयो गुणनीयः त्रिंशद्भक्तः रवेर्भुक्तं भोग्यं वा भोग्यं पलरूपं तत् इष्ट नाडीपलेभ्यस्त्यजेच्छेषयेत् तदनन्तरं शेषात् गतगम्यान्निजोदयात्त्यजेत् तद्यथा यदा भुक्तकालः साध्यते तदा गुणितोदयात् इष्टोदयाः शोध्याः यदा भोग्यकालः साध्यते तदा गुणितोदयादग्रिमोदयाः शोध्याः शोधिते यच्छेषं तत् खघ्नं ३० हतं अशुद्धेन यः शोधितो न शुद्धयति स अशुद्धोदयः तेन भक्तं फलं संप्राप्तादिकं ग्राह्यं तत् अशुद्धभेहीनेकार्यं शुद्धभेयुक्कार्यं तद्यथा कालग्नसाधनेमेषाद्गणनया यद्राशिसंख्याकोऽशुद्धोदयो भवति तद्राशिसंख्यामध्ये लवादिकं हीनं कार्यं धनलग्नसाधने मेषाद्गणनया यद्राशिसंख्याकोऽशुद्धात्पूर्वोदयो भवति तद्राशिसंख्यामध्ये लवादिकं योज्यं तदनन्तरं अयनांशा अयनांशैर्हितं कार्यं तन्नलग्नं स्यात् एवमनया रीत्या लंकोदयैः कृत्वा रवेर्भुक्तं भोग्यं साध्यं तत्पलीकृतात्पूर्वपश्चिमनता

तत्काले सायनार्कस्य भुक्तभोग्यांशसंगुणात् स्वोदयात्त्वाग्निलब्धं यद्भुक्तं भोग्यं रवेस्त्यजेत् २१ इष्टनाडीपलेभ्यश्च गतागम्यान्निजोदयान् शेषं खघ्नाद्धतं भक्तमशुद्धेन लवादिकम् २२ अशुद्धशुद्धभेहीनयुक्तं तन्नं व्ययनांशकम् एवं लंकोदयैर्भुक्तं भोग्यं शोध्यं पलीकृतात् २३ पूर्वपश्चान्नतादन्यत्प्राग्वद्दशमं भवेत् सषड्ढे लग्नखेजायात तुर्यौ लग्नोनतुर्यतः २४ ॥ ॥

शोध्यं अन्यदवशिष्टं यत्कर्म तत्प्राग्वत् पूर्वोक्तया रीत्या साध्यं तद्दशमं भवेत् तद्यथा यदा पूर्वनतं भवति तदा पूर्वनतमिष्टकालं प्रकल्प्य लं कोदयैः कृत्वा रवेर्भुक्तं साध्यं अन्या क्रिया कालग्नवत् यदा पश्चिमनतं भवति तदा पश्चिमनतमिष्टकालं प्रकल्प्य लंकोदयैः कृत्वा रवेर्भोग्यं साध्यं अन्य क्रिया धनलग्नवत्कार्या तद्दशमं भवेत् २४ अथ लग्नदशमभावोत्क्रान्त्यभावसाधनमाह सषड्ढ इति २४ लग्नराशिषड्भयुते जायाख्यो भावो भवति एवं दशमं सषड्भं तुर्यं च तुर्यभावो भवति एवं भावचतुष्टयं जातं अथ लग्नोनतुर्यतः लग्नं चतुर्थभावाच्छोध्यं शेषस्य षष्ठांशो ग्राह्यः पदिलेन युक्तं तन्नलग्नं कार्यं तल्लग्नद्वितीयभावयोः संधिः स्यात् लग्नस्य विरामसंधिः धनभावस्यारंभसंधिरिति सर्वत्र ज्ञेयं अग्रे षष्ठांशयोजनादिति सएव आगतसंधिः षष्ठांशेन युक्तो अग्रे द्वितीयभावः स्यात् द्वितीयभावः ॥ २२ ॥

युक्तायनांशार्कगतैष्यभागा लंकोदयघ्नाः खगुणे ३० हृताः तत् स्याद्भुक्तभोग्यं तयनस्य जह्यान्यली कृतान्प्राग परान्नतात्तत् क्रमाद्धतैष्यानुदयांश्च शेषमशुद्धहृन्नवाग्नि ३० गुणं लवाद्य विशुद्धपूर्वापरभे विहीनयुतं खमं स्यादयनांशहीनम् ॥

जंबूपुरे स्वोदयाः पलानि
मे २०३ मी
वृ २३९ कुं
मि २९८ म
क ३४८ ध
सिं ३५९ वृ
क ३५३ तु

मे	२७८	मी
वृ	२९९	कुं
मि	३३३	म
क	३३३	ध
सिं	२९९	वृ
क	२७८	तु

हद्दाविंशांचक्रम्

मे	वृ	मि	कं	सिं	कं	तु	वृं	धं	मं	कुं	मी
जी ६	शु ८	बु ६	भौ ७	जी ६	बु ७	श ६	भौ ७	जी १२	बु ७	बु ७	शु १२
शु ६	बु ६	शु ६	शु ६	शु ५	शु १०	बु ८	शु ४	शु ५	जी ७	शु ६	जी ४
बु ८	जी ८	जी ५	बु ६	श ७	जी ४	जी ७	बु ८	बु ४	शु ८	जी ७	बु ३
भौ ५	श ५	भौ ७	जी ७	बु ६	भौ ७	शु ७	जी ५	भौ ५	श ४	भौ ५	भौ ९
श ५	भौ ३	श ६	श ४	भौ ६	श २	भौ २	श ६	श ४	भौ ४	श ५	श २

अथ पंचवर्गीबलमाह त्रिंशदिति ३९ स्वभे स्वांशे ग्रहे विंशल्लवाः बलं स्वोच्चस्ये विंशतिर्बलं स्वहद्दस्ये पंचदश बलं स्वद्रेष्काणस्थे दशबलं मुसल्लहे स्वनवांशस्थे पंचलवाः प्रदिष्टाः उक्ताः वेदलवैः बलस्य चतुर्थो ऽशो विंशोपकाः प्रकल्प्याः ३९ यदा ग्रहः स्वगृहस्वोच्चस्वहद्दा स्वद्रेष्काणस्वनवांशेषु पंचस्वधिकारेषु क्वापि नास्ति तदा बलमाह स्वस्वाधिकारेति ४० स्व स्वाधिकारोक्तबलस्य विभागः सुहृद्गृहे मित्रगृहे पादोनचतुर्थांशोनं बलं ग्राह्यं समभे सम गृहे ऽर्धं अरिभे शत्रुगृहे चतुर्थांशो बलं स्यात् तद्यथा ग्रहस्य स्वगृहे त्रिंशल्लवाः बलं स्यात् मित्रगृहे पादोने सार्धद्वाविंशति २२।३० जातः समभे ऽर्धे पंचदश १५ जा ताः शत्रुगृहे चतुर्थांशः सार्धसप्त जाता ७।३० तथा स्वहद्दायां पंचदश १५ मित्रहद्दा

विंशात्स्वभे विंशातिरुच्चभे स्वहद्दे स्वं चेंशा दशकं हकाणे मुसल्लहे पंचलवाः प्रदिष्टा वि शोपकाः वेदलवैः प्रकल्प्याः ३९ स्वस्वाधिकारोक्तबलं सुहृद्भे पादोनमर्धं समभे रि भे युक्तिः एवं समानीय बलं तदैक्यं वेदोद्धृतेहीनबलः शरोनः ४० ॥ ३९॥

यां सपादाएकादश ११।१५ समहद्दायां सार्धाः सप्त ७।३० शत्रुहद्दायां पादोनाश्चत्वारः ३।४५ तथा स्वद्रेष्काणे दश १० मि त्रद्रेष्काणे सार्धाः सप्त ७।३० समद्रेष्काणे पंच ५ शत्रुद्रेष्काणे सार्धद्वयं २।३० एवं स्वनवांशे पंच ५ मित्रनवांशे पादोनाश्च त्वारः ३।४५ समनवांशे सार्धद्वयं २।३० शत्रुनवांशे सपादमेकं १।१५ बलं स्यात् एवं पंचवर्गीबलं समानीय तदैक्यं पंचानां योगो वेदैः ४ हृते चतुर्भिर्भक्ते यल्लब्धं तद्विंशोपकात्मकं ग्रहाणां बलं भवति शरोनः पंचभ्योन्यूनं हीनबलो ग्रहो ज्ञेयः उक्तं च पंचाल्पे हीनवीर्यः स्यादधिके मध्य उच्यते दशाधिके बली प्रोक्तं पंचवर्गीबलादिदम् इति ४० बलचक्रम् ॥ ॥

दयः २०३ शेषाच्छोधिते शेषं २५४।१६।१९ मीनादग्रे मेषोदयः २०३ शेषाच्छोधिते शेषं ५१।१६।१९ मेषादग्रे वृषोदयः २९९ अयं शेषात् ५१।४६।१९
न शुद्ध्यति अतः शेषं ५१।४६।१९ खगुणा ३० हते १५५३।८।० अशुद्धोदयेन २९९ भक्तं लब्धं मेषादिके ५।१२।२९।५४ इदमशुद्धात् पूर्वशेषात्
गणनया एकोराशिस्तेन युक्तं १।५।२९।५४ इदमयनांशैः १८।२९ हीनं जातं लग्नं ०।१८।३।५४ राशिषट्कयुतं जातं जायाभवनं ६।१८।३।५४
अथ दशमलग्नस्योदाहरणं तत्र लंकोदयाः मे २२८ वृ २९९ मि ३२३ कर्के ३२३ सिं २९९ कं २२८ तु २२८ वृ २९९ धं ३२३ म ३२३ कुं २९९ मी २२८
दिनार्द्धं १२।४५ दिनगतघटीभिः १२।१८।३० हीनं जातं पूर्वनतं ०।२७।३० अथमिष्टकालः लंकोदयैः कृत्वा जातो भुक्तकालः २७।१७।०
अयमिष्टघटीपलेभ्यः २७।३० न शुद्ध्यति अतः शेषं २७।३० त्रिंशद्गुणितं ८२५ स्वोदयेन ३२३ भक्तं फलं लवादिकं २।२२।१६ इदं राशि
अयनादि सूर्यमध्ये ९।०।३०।१६ हीनं जातं दशमलग्नं ९।५।८।० इदं राशिषट्कयुतं जातं सुखभवनं ३।५।८।० लग्नहीनचतुर्थभवनस्य
शेषं २।१७।४।१६ इदं षड्भक्तं लब्धं राश्यादि ०।१२।५०।४१ अनेन युक्तं लग्नादिर्जातो लग्नस्य विरामसंधिः १।०।५४।३५ अयं षष्ठांशेन युतः
जातो द्वितीयभावः १।१३।४५।१६ अयं षष्ठांशेन युतो जातो द्वितीयभावस्य संधिः १।२६।३५।५७ अयं षष्ठांशेन युतो जातस्तृतीयो भावः २।९।

त्वेदेसंधिद्वयांतस्थेफलंतद्भावजंवदेत् हीनेधिके हि संधिभ्यां भावे पूर्वापरे फलम् २८ ॥

२६।३८ अयं षष्ठांशेन युतो जातस्तृतीयभावस्य संधिः २।२२।१७।१९ प्रागानीतषष्ठांशाः ०।१२।५०।४१ अयं रूपात् १ शोधितः शेषं ०।१७।
०।१९ अनेन सुखभावो युक्तो जातः सुखभावस्य संधिः ३।२२।१७।१९ अयं तेन युक्तो जातः पंचमभावः ४।९।२६।३८ अयं तेन युक्तो जा
तः पंचमभावसंधिः ४।२६।३५।५७ अयं तेन युक्तो जातः पंचमभावः ४।९।२६।३८ अयं तेन युक्तो जातः पंचमभावसंधिः ४।२६।३५।५७
अयं तेन युक्तो जातः षष्ठभावः ५।१३।४५।१६ अयं तेन युक्तो जातो रिपुभावस्य संधिः ६।०।५४।३५ एते राशिषट्कयुताः अवशिष्टभावाः ससंध
यो जाताः सर्वे एकत्र लिख्यन्ते अथ भावस्थग्रहफलमाह त्वेदद्वितिः
त्वेदेसंधिद्वयांतस्थे तदयथा आदेष्यारंभसंधेः सकाशादधिके सति वि
हि संधिभ्यां हीनेधिके ग्रहे सति पूर्वापरे भावे फलं लभेत् तदयथा आरंभसंधेः
४ रामसन्धेः सकाशान्न्यूने सति तदा ग्रहो यस्मिन्भावे वर्त्तते तद्भावजं फलं लभेत्

त	ध	सं	स	सुत	रि	जा	मृ	ध	क	आ	व्य	मे	वृ	मि	कर्क	सिं	कं
०	१	२	३	४	५	६	७	८	९	१०	११	२२३	२३९	२९८	३४८	३५१	३५२
१८	१३	९	५	९	१२	१८	१२	९	५	९	१२						
३	४५	२६	६	२६	४१	३	४५	२६	८	२६	४५						
५४	१६	३८	०	३८	१६	५४	१६	३८	०	३८	१६						
सं	सं	सं															
१	१	२	३	४	६	७	७	८	९	१०	०	मी	कुं	म	ध	वृं	तु
०	२६	२२	२२	२६	०	०	२६	२२	२२	२६	०						
५४	३५	१७	१७	३५	५४	५४	३५	१७	१७	३५	५४						
३५	५७	१९	१९	५७	३५	३५	५७	१९	१९	५७	३५						

नी·के·
री·
वि·का·
८

हद्दाविंशोपकचक्रम्

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
जी ६	शु ६	बु ६	भौ ७	जी ६	बु ७	शु ६	भौ ७	जी १२	बु ७	बु ७	शु १२
शु ६	बु ६	शु ६	शु ६	शु ५	शु ६	बु ६	शु ४	शु ५	जी ७	शु ६	जी ४
बु ८	जी ८	जी ५	बु ६	श ७	जी ४	जी ७	बु ८	बु ४	श ८	जी ७	बु ३
भौ ५	श ५	भौ ७	जी ७	बु ६	भौ ७	शु ७	जी ५	भौ ५	श ४	भौ ५	भौ ९
श ५	भौ ३	श ६	श ४	भौ ६	श २	भौ २	श ६	श ४	भौ ४	श ५	श २

अथ पंचवर्गीबलमाह त्रिंशदिति ३९ स्वभे स्वांशे ग्रहे त्रिंशल्लवाः बलं स्वोच्चस्थे विंशतिर्बलं स्वहद्दस्थे पंचदश बलं स्वद्रेष्काणस्थे दश बलं मूसले हे स्वनवांशस्थे पंच लवाः प्रदिष्टाः उक्ताः वेदलवैः बलस्य चतुर्थांशो विंशोपकाः प्रकल्प्याः ३९ यदा ग्रहः स्वगृहे स्वोच्चे स्वहद्दा स्वद्रेष्काणे स्वनवांशेषु पंचस्वधिकारेषु क्वापि नास्ति तदा बलमाह स्वस्वाधिकारेति ४· स्वस्वाधिकारोक्तबलस्य विभागः सुहृद्गृहे मित्रगृहे पादोनचतुर्थांशोने बलं ग्राह्यं समभे सम स्वगृहे अर्धं अरिभे शत्रुगृहे अंघ्रिश्चतुर्थांशो बलं स्यात् तद्यथा ग्रहस्य स्वगृहे त्रिंशल्लवाः बलं स्यात् मित्रगृहे पादोने सार्धद्वाविंशति २२।३· जाताः समभे अर्धे पंचदश १५ जाताः शत्रुगृहे चतुर्थांशः सार्धसप्त जाता ७।३· तथा स्वहद्दायां पंचदश १५ मित्रहद्दा

त्रिंशत्स्वभे विंशतिरुच्चभे स्वहद्देऽर्कचंद्रा दशकं द्रेकाणे मूसले हे पंच लवाः प्रदिष्टा विंशोपका वेदलवैः प्रकल्प्याः ३९ स्वस्वाधिकारोक्तबलस्य हृद्भे पादोनमर्धं समभे रिभेऽङ्घ्रिः एवं समानीय बलं तदैक्ये वेदोद्धृते हीनबलः शरोनः ४· ॥ ३३॥

यां सपादा एकादश ११।१५ समहद्दायां सार्धाः सप्त ७।३· शत्रुहद्दायां पादोनाश्चत्वारः ३।४५ तथा स्वद्रेष्काणे दश १· मित्रद्रेष्काणे सार्धाः सप्त ७।३· समद्रेष्काणे पंच ५ शत्रुद्रेष्काणे सार्द्धद्वयं २।३· एवं स्वनवांशे पंच ५ मित्रनवांशे पादोनाश्चत्वारः ३।४५ समनवांशे सार्धद्वयं २।३· शत्रुनवांशे सपादमेकं १।१५ बलं स्यात् एवं पंचवर्गीबलं समानीय तदैक्ये पंचानां योगे वेदैः ४ हृते चतुर्भिर्भक्ते यल्लब्धं तद्विंशोपकात्मकं ग्रहाणां बलं भवति शरोनः पंचभ्योन्यूनः हीनबलो ग्रहो ज्ञेयः उक्तं च पंचाल्पे हीनवीर्यः स्यादधिके मध्य उच्यते दशाधिके बली प्रोक्तं पंचवर्गीबलादिदम् इति ४· बलचक्रम् ॥ ३३ ॥

८

नी॰ टं॰
टी॰
१०

अथद्रेष्काणचतुर्थांशानामीशानाह ओजइति ४२ ओजे विषमराशौ गृहार्धे पंचदशांशाः तत्प्रमिते रवीन्द्वोर्होरे विचिन्त्ये ते तद्यथा प्रथमपंचदशभागमध्ये सूर्यस्य तदनंतरं चंद्रस्य तथा समराशौ चन्द्ररव्योर्विचिन्त्ये अथद्रेष्काणेशा उच्यन्ते राशेस्त्रिभागो दशांशपरिमितो द्रेष्काणो ज्ञेयः यस्य द्रेष्काणविचारः क्रियते स चेत्प्रथमविभागमध्ये तदा स यस्मिन्राशौ तिष्ठति तद्राशिस्वामिन एव द्रेष्काणाधीशत्वं द्वितीयद्रेष्काणश्चेत्तदा स्वराशितः पंचमो यो राशिस्तत्स्वामिन एव द्रेष्काणाधीशत्वं तृतीयद्रेष्काणश्चेत्तदा स्वराशितो नवमो यो राशिस्तत्स्वामिन एव द्रेष्काणाधीशत्वं अथ तुर्यांशस्वामिन उच्यन्ते स्वर्क्षजकेन्द्रनाथा इति स्वर्क्षं ग्रहाधिष्ठितो राशिः तस्माज्जातानि केन्द्राणि तन्नाथा एव चतुर्थांशस्वामिनः तद्यथा राशेस्त्रिंशद्देशास्तस्य चतुर्थांशाः सार्धाः सप्तांशाः ७।३० तत्प्रथमविभागमध्ये स्वर्क्षे स्वराशिस्वामिन एवाधिपत्यं द्वितीयविभाग १५।० मध्ये केंद्रनाथः स्वराशेः सकाशाच्चतुर्थो यो राशिस्त

ओजे रवीन्द्वोः समके ऽरव्योर्होरे गृहार्धप्रमिते विचिन्त्ये द्रेष्काणपाः स्वेषुनवर्क्षनाथास्तुर्यांशपाः स्वर्क्षजकेन्द्रनाथाः ४२ ओजेऽर्कपंचमांशेशाः कुजार्कीज्यज्ञभार्गवाः समभे व्यत्ययाज्ज्ञेया द्वादशांशाः स्वभात्स्मृताः ४३॥

त्स्वामिन एवाधिपत्यं तृतीयभाग २२।३ मध्ये स्वराशेः सकाशात्सप्तमो यो राशिस्तत्स्वामिन एवाधिपत्यं चतुर्थविभाग ३०।० मध्ये स्वराशेः सकाशाद्दशमो यो राशिस्तत्स्वामिन एवाधिपत्यं अथ पंचांशेशान्द्वादशांशेशानाह ओजर्क्ष इति ४३ पंचमांशप्रमाणं षडंशाः ६ एकराशौ पंच भवन्ति ओजर्क्षे विषमराशौ प्रथमपंचमांशस्वामी कुजः द्वितीयपंचमांशस्वामी शार्किः शनिः तृतीयपंचमांशस्वामी इज्यो गुरुः चतुर्थपंचमांशस्वामी ज्ञो बुधः पंचमपंचमांशस्वामी भार्गवः शुक्रः समभे समराशौ व्यत्ययाद्विपरीता ज्ञेयाः तद्यथा समराशौ प्रथमपंचमांशस्वामी [illegible] पंचमपञ्चमांशस्वामी [illegible] शुक्रः। द्वितीयपंचमांशस्वामी बुधः तृतीयपंचमांशस्वामी गुरुः चतुर्थपंचमांशस्वामी शनिः पंचमपञ्चमांशस्वामी भौमः अथ द्वादशांशस्वामिन उच्यन्ते द्वादशांशाः स्वभात्स्वराशेः सकाशात्स्मृताः यथा द्वादशांशप्रमाणं सार्धमंशद्वयं २।३ एवं राशौ द्वादश भवन्ति तद्यथा एतत्प्रमाणेन यत्र स्थाने २।३ अंशे ग्रहस्तिष्ठति स्वराशितस्तत्संख्यराशौ द्वादशांशो ज्ञेयः ४३ ॥८॥

१०

भसंख्यैः सप्तविंशतिभिरंशैः शनेस्तुलाख्ये तूच्चं नखसंमिते विंशतिभिरंशैः परमोच्चमिति सर्वत्र ज्ञेयम् ॥ अथ ग्रहाणां नी
चस्थानमुच्चबलानयनं नवांशस्वामिनश्चाह तत्सप्तममिति १२ तेषां सूर्याद्युच्चराशीनां सप्तमस्तुलादिको राशि
नीचं ग्रहाणां स्थानमेव यथा सूर्यस्य तुलानीचं दशभिरंशैः परमम् एवं चन्द्रादीनां ज्ञेयं अनेन नीचेन ग्रहो हीनः शुद्धः स
भाधिकं त्यक्त्वा चक्राद्द्वादशराशिभ्यः शोध्यः शेषसांशाः कार्याः नवभिर्भाज्याः लब्धं कलादि उच्चबलं स्यात्
अथ नवांशोपि उच्यन्ते क्रियेति क्रियो मेषः एणो मकरः तौलिः तुला इन्दुभं कर्कः एते मेषादिराशीनां त्रिरावृत्त्या आद्या भवन्ति ते
यथा मेषसिंहधनूराशीनामाद्यो मेषः वृषकन्यामकरराशीनामाद्यो मकरः मिथुनतुलाकुंभराशीनामाद्यस्तुला कर्कट

उच्चफलम्

०	१	९	५	३	११	६
१०	३	२८	१५	५	२७	२०
सू	चं	भौ	बु	जी	शु	श
६	७	३	११	९	५	०
१०	३	२८	१५	५	२७	२०

नीचफले

तत्सप्तमं नीचमनेन हीनो ग्रहोधिकश्चेद्भसमाद्विशोध्यः चक्रान्तदंशांकलवो बलं स्यात् क्रियैणतौलीन्दुभतो नवांशाः १२ मेषेंग
नृकाष्टशरेषु भागा जीवास्फुजिज्ज्ञारशनैश्चराणाम् वृषेष्टबाणागशरानलांशाः शुक्रज्ञजीवार्किकुजेशहद्दाः १३ युग्मे षड्भोगपु
गागभागाः सौम्यास्फुजिज्जीवकुजार्किहद्दाः कर्केद्रितर्कागनगाब्धिभागाः कुजास्फुजिज्ज्ञेज्यशनैश्चराणाम् १४ सिंहेंगभूताद्रि
रसांगभागा देवेज्यशुक्रार्किबुधारहद्दाः स्त्रियां नगाशाग्निनगाग्निभागाः सौम्यास्फुजिज्जीवकुजार्किनाथाः १५ तुलेरसाष्टाद्रिन
गाग्निभागाः कोणज्ञजीवास्फुजिदारनाथाः कीटेनगाब्धष्टशरांगभागा भौमास्फुजिज्ज्ञेज्यशनैश्चराणाम् १६ चापेर्कवीष
युविपञ्चवेदा जीवास्फुजिज्ज्ञारशनैश्चराणाम् मृगेनगाब्धष्टयुगाश्रुतीनां सौम्येज्यशुक्रार्किकुजेशहद्दाः १७ कुंभेन
गागादिशरेषु भागा ज्ञशुक्रजीवारशनैश्चराणाम् मीनेर्कवेदानलनन्दपक्षाः सितेज्यसौम्यारशनैश्चराणाम् १८ ॥ ६६ ॥

मे	म	तु	क
मे	वृ	मि	कु
सिं	कं	तु	वृ
धं	म	कुं	मी

इति नवांशचक्रं

वृश्चिकमीनराशीनामाद्यः कर्कः उक्तं च मेषकेसरिचापानां मेषाद्यास्तु नवांशकाः वृषकन्यामृगाणां मकराद्या नवांशकाः मि
थुनतुलकुंभानां तुलाद्यास्तु नवांशकाः कर्कवृश्चिकमीनानां कर्कटाद्या नवांशकाः इति १२ अथ षड्भिः श्लोकैर्मेषादिद्वाद
शराशिषु हद्दानाह मेषेंगेत्यादिभिः १८ एषामर्थः स्पष्टः स्थापनेनैव व्याख्यामः यथा मेषराशौ प्रथमषडंशानां जीवो गुरुः ततः
षडंशानां आस्फुजिच्छुक्रः ततोष्टानामंशानां ज्ञो बुधः ततः पंचानामंशानामारो भौमः ततः पंचानामंशानां शनैश्चरः स्वामी एवमेव

नी॰के॰

१२

ऽत्स्वामी बुधः एवं जात एकादशांशस्वामी बुधः अथ द्वादशांशः एवं द्वादशांशविभागगणनया चतुर्थविभागमध्ये वर्त्तते
अतः मकराद्गणनया जातः चतुर्थो मेषराशिस्तत्स्वामी भौमः एवं जातो द्वादशांशस्वामी भौमः एवं चेन्द्रादीनामपि ज्ञेयं ४४ ग्र
हाणां द्वादशवर्गीचक्रम् अथ द्वादशवर्गफलमाह एवमिति ४५ एवं ग्रहाणां बलसिद्धये द्वादशवर्गी स्यात् सा द्वादशव
र्गी स्वोच्चमित्रशुभा श्रेष्ठा तद्यथा यस्य ग्रहस्य द्वादशवर्गी क्रियते स चेत्स्वगृहादिषु अथ स्वोच्चवर्गः अ
थवा मित्रवर्गः अथवा शुभग्रहस्य वर्गे तिष्ठति तदा श्रेष्ठा शुभफलदात्री स ग्रहः यदि नीचवर्गे अथवा
शत्रुवर्गे अथवा पापग्रहस्य वर्गे चेत्तिष्ठति तदा अशुभा अनिष्टफलदात्री ४५ अथ द्वादशवर्गे शुभपापवर्ग
फलनिर्णयः कथं स्यादित्यत आह एवं ग्रहाणामिति ४६ एवं ग्रहाणां शुभपापवर्गपंक्तिद्वयं वीक्ष्य तद्यथा
पूर्वोक्तप्रकारेण ग्रहाणां द्वादशवर्गिका कार्या तत्र ग्रहस्य आदिद्वादशस्थानेषु क्रियन्तेः शुभग्रहवर्गा

एवं द्वादशवर्गी स्याद्ग्रहाणां बलसिद्धये स्वोच्चमित्रशुभा श्रेष्ठा नीचारिक्रू
रोऽशुभा ४५ एवं ग्रहाणां शुभपापवर्गपंक्तिद्वयं वीक्ष्य शुभाधिकत्वे द
शाफलं भावफलं च वाच्यं शुभं त्वनिष्टं त्वशुभाधिकत्वे ४६ ॥ २२

पापवर्गाः क्रियन्ते इति विचार्य शुभग्रहसंख्या भिन्ना लेख्या पापग्रहसंख्या च भिन्ना लेख्या
पंक्तिद्वयस्यान्तरं कार्यं यदि शुभाधिकत्वे शुभग्रहस्य शेषमवशिष्टं तदा तद्ग्रहस्य दशाफ
लं भावफले च शुभं शुभाधिकमेव वाच्यम् यदि पापग्रहाधिकत्वे पापग्रहस्य शेषमव
शिष्टं तदा तद्ग्रहस्य दशाफलं भावफलं चानिष्टमेवाधिकत्वं वाच्यम् ४६ ॥ २२

श्रा	चं	भौ	बु	जी	शु	श	ग्रहाः
श	बु	जी	जी	शु	भौ	शु	होरेशाः
चं	श्रा	श्रा	श्रा	चं	श्रा	श्रा	होरेशा
श	शु	स्व	भौ	श्रा	चं	शु	त्रिलवेशाः
भौ	जी	जी	जी	बु	श्रा	शु	चतुर्लवाः
बु	श	जी	जी	शु	भौ	स्व	पंचलव
भौ	श	बु	स्व	बु	श	शु	षष्ठलव
स्व	श्रा	जी	श	बु	स्व	भौ	सप्तलव
बु	श	स्व	भौ	स्व	बु	शु	अष्टल॰
जी	चं	श्रा	चं	स्व	श	जी	नवमांश
जी	श	स्व	भौ	बु	स्व	बु	दशमल॰
बु	चं	श	जी	शु	स्व	जी	एकादशल॰
भौ	शु	शु	भौ	भौ	श्रा	जी	द्वादशा

अथक्रमशश्च न्मदाहरणप्रदर्शनार्थं वक्ष्यमाणमित्रशत्रवो लिख्यन्ते उदाहरणं सूर्यः ९।७।३०।१९ अस्य मकरराशौ स्थितत्वाद्धेत
शः शनिः अयं सूर्यस्य शत्रुः अतः कारणात् हद्देशाभवं बलं सार्धाः सप्त ७।३० अथ उच्चबलं सूर्यस्य नीचं ६।१० अनेन हीनो रविः ३।२९
३०।१९ अस्यांशाः ८७।३०।१९ नवभिर्भक्तः जातं सूर्यस्योच्चबलं ९।४३ अथ हद्देशाबलं मकरराशौ सूर्यस्य सप्तमे शास्त्रिंशकलावर्तते
मकरराशौ हद्दायामादौ सप्तमे अंशाः अयं सप्ताधिकोऽग्रिमसप्तमध्ये वर्तते इति कारणात् जातो हद्देशो गुरुः अयं सूर्यस्य समो भवति
सम हद्दायां शत्र बलं ७।३० अथ द्रैष्काणिक बलं मकरराशौ प्रथमाद्दशाक मध्ये वर्तते तद्दीशो गुरुः अस्य समत्वात् सार्धसप्त द्रैष्काणिक ब
लं ७।३० अथ मुसल्लहबलं नवांशगणनया जातो मुसल्लह ईशो गुरुः अस्य समत्वात् सार्धं नवांशबलं ७।३० पंचानां योगः ३४।५४ चत
र्भिर्भक्तः जातं सूर्यस्य विंशोपकात्मकबलं ८।४३ एवं चंद्रादीनामपि ज्ञेयं पंचवर्गीचक्रं लिख्यते ४० अथ द्वादशवर्गीचक्रमाह
तत्रमिति ४१ तत्र गृहे होरात्रिलवाः चतुर्लवः पंचलवः षड्लवः सप्तलवः अष्टलवः अंकलवः दशलवः एकादशलवः द्वादश

तत्रं होरात्र्यं त्रि पंचांग सप्त वसु अंक दिश एशार्क भागाः सुधीभिः विज्ञातव्या लग्नसंस्थाः शुभानां वर्गाः श्रेष्ठाः पापवर्गा अनिष्टाः ४१

लवः एते द्वादश भागाः लग्नसंस्थाः लग्नसमये विद्यमानग्रहाणां सुधीभिर्विज्ञातव्याः शुभानां शुभग्रहाणां वर्गाः श्रेष्ठः शुभफ
लदास्तेयाः पापग्रहाणां वर्गाश्चेत्कुलदाः निष्टा उ ह फलदाश्चेयाः ४१॥

आ	चं	भौ	बु	जी	शु	श	ग्रं
चं शु	आ शु	श	श	श	आ च	भौबु जी	मित्र
भौबु जी	श	आ शु	आ शु	आ शु	श भौ बुजी	चं शु	सम
श	भौ बुजी	चंबु जी	चंभौ ट	चंभौ बु	.	आ	शत्रु

इतिचक्रं दृष्टम्

मित्र	सम	शत्रु
३	२	१
५	६	४
९	८	७
११	१२	१०

लग्न	मित्र	सम	शत्रु	बलचक्रं
३० -	२२ ३०	१५ -	७ ३०	गृह
१५ ०	११ १५	७ ३०	३ ४५	हद्दा
१० -	७ ३०	५ -	२ ३०	द्रेष्काणि
५ -	३ ४५	२ ३०	१ १५	मुसल्लह

बलचक्रम्

ग्रं	आ	चं	भौ	बु	जी	शु	श
स्थान	७ ३०	७ ३०	७ ३०	७ ३०	३० -	१५ -	१५ -
उच्च	९ ४३	४ ३२	१५ १०	१० १८	० २९	६ २२	१८ ३२
हद्दा	७ ३०	३ ४५	७ ३०	७ ३०	१५ -	७ ३०	१५ -
द्रेष्का	५ -	२ ३०	२ ३०	२ ३०	७ ३०	१० -	५ ७
मुसल्ल	२ ३०	५ -	२ ३०	१ १५	५ -	२ ३०	३ ४५
योग	३२ १३	२३ १७	३५ १०	२९ ३०	५८ ५९	४१ २२	५७ २२
विंश	८ ३	५ ४७	८ ४७	७ १५	१४ ४४	१० ४२ २०	१४ ५२

॥ पंचवर्गीबलचक्रम्

नी० कं०
टी०
१२

